# आयुर्वेदस्य भाषा संस्कृतं पठ्यताम्

SPF
प्रकाशनविभागः

***'सर्वे सन्तु निरामयाः'*** इति भारतीयानां चिन्तनम् अस्ति। अतः सर्वेषां निरामयस्य सङ्कल्पनां मनसि निधाय ***'कथं लोकाः निरामयाः भवेयुः?'*** इति प्रश्नस्य समाधानाय महर्षयः अहर्निशं प्रयतमानाः आसन्। ते च ऋषयः जीविनाम् आयुषः वर्धनाय लोकनिरामयाय च स्वानुसन्धानेन दिव्यज्ञानेन च **अत्रिसंहिता, चरकसंहिता, सुश्रुतसंहिता, अष्टाङ्गहृदयम्, भावप्रकाशः, माधवनिदानम्, अष्टाङ्गसङ्ग्रहः, भेलसंहिता, पराशरसंहिता** इत्यादीन् बहून् आयुर्वेदीयान् ग्रन्थान् लिखितवन्तः सन्ति। एतेषु ग्रन्थेषु ***'जनाः कथम् आमयरहिताः अर्थात् रोगरहिताः सन्तः जीवितुं प्रभवन्ति ?'*** इति विषयः उक्तः वर्तते।

**'एतादृशाः आयुर्वेदग्रन्थाः अध्येतव्याः'** इति जनानाम् इच्छा भवति एव। किन्तु एतादृशाः आयुर्वेद-ग्रन्थाः संस्कृतेन लिखिताः सन्ति। अतः आयुर्वेदग्रन्थानां भाषायाः अवगमनाय '**आयुर्वेदस्य भाषा संस्कृतं पठ्यताम्**' इति कश्चन पाठ्यक्रमः ***संस्कृत-संवर्धन-प्रतिष्ठानेन*** निर्मितः अस्ति। ***'आयुर्वेदस्य भाषा'*** इत्यनेन '***आयुर्वेदीयग्रन्थेषु प्रयुक्तायाः संस्कृतभाषायाः शैली'*** इति अभिप्रायः अस्ति।

प्रत्येकमपि शास्त्रस्य काचित् स्वकीया भाषा भवति। यथा **गीतायाः भिन्ना भाषा, न्यायशास्त्रस्य भाषा भिन्ना, विज्ञानस्य भाषा भिन्ना, गणितस्य भाषा भिन्ना तथैव आयुर्वेदस्य भाषा अपि भिन्ना वर्तते।**

अस्मिन् पाठ्यक्रमे आयुर्वेदीयग्रन्थेषु प्रयुक्तायाः संस्कृतभाषायाः पाठनं क्रियते। आयुर्वेदीयग्रन्थेषु प्रमुखतया ***समासस्य, सन्धेः, विधिलिङ्लकारस्य, प्रत्ययानाम् अव्ययानां*** च बाहुल्येन प्रयोगः दृश्यते। अस्मिन् पाठ्यक्रमे प्रमुखतया चत्वारः भागाः सन्ति।

- अत्र प्रथमे भागे संस्कृतसम्भाषणाय आवश्यकानां बिन्दूनां द्वारा आयुर्वेदीयशब्दानां परिचयः कृतः वर्तते। अर्थात् आयुर्वेदीयशब्दानां द्वारा कथं सम्भाषणं करणीयम् इति प्रदर्शितम् अस्ति।
- द्वितीये भागे विभक्तीनां परिचयः, हलन्तशब्दाः, विशेष्यविशेषणपरिचयः, लकाराः, कर्मणिप्रयोगः, भावेप्रयोगः, प्रत्ययाः इत्यादयः विषयाः प्रदर्शिताः सन्ति। एतेषाम् उपस्थापनाय आयुर्वेदीयग्रन्थेभ्यः विषयाः पदानि च स्वीकृतानि सन्ति। अत्र विभिन्नाः सम्भाषणात्मकाः पाठाः सन्ति।
- तृतीये भागे संस्कृतव्याकरणस्य मुख्यानि तत्त्वानि प्रदर्शितानि सन्ति। यथा – सन्धिः, समासः, कारकम्, कृदन्तम्, तद्धितम् इत्यादीनि।

  - समासप्रकारेषु अपि ***तत्पुरुषस्य बहुव्रीहेः द्वन्द्वस्य*** च अधिकतया प्रयोगः दृश्यते। यथा – अष्टाङ्गहृदयस्य प्रथमश्लोकस्य **समस्तपदानि** पश्यामः –

**रागादिरोगान् सततानुषक्तानशेषकायप्रसृतानशेषान्।**
**औत्सुक्यमोहारतिदाञ्जघान योऽपूर्ववैद्याय नमोऽस्तु तस्मै ॥१॥**

**समस्तपदानि -** रागादिरोगान्, सततानुषक्तान्, अशेषकायप्रसृतान्, अशेषान्, औत्सुक्यमोहारतिदान्, अपूर्ववैद्याय

- सन्धिप्रकारेषु अपि आधिक्येन स्वरसन्धिषु **सवर्णदीर्घसन्धेः पूर्वरूपसन्धेः** च, व्यञ्जनसन्धिषु **जश्त्वसन्धेः श्चुत्वसन्धेः ष्टुत्वसन्धेः** च, **विसर्गसन्धेः** च बाहुल्येन प्रयोगः दृश्यते। यथा –

**रागादिरोगान्, योऽपूर्ववैद्याय, नमोऽस्तु, सन्निपातश्च, तैर्भवेद्विषमः**

- विधिलिङ्लकारस्य प्रयोगः तु आयुर्वेदस्य प्रत्येकस्मिन् ग्रन्थे प्रमुखत्वेन प्राप्यते। अष्टाङ्गहृदये यथा –

मैत्रीं सद्भिः समं **कुर्यात्** स्नेहं सत्सु तु सर्वथा।
संसर्गं साधुभिः **कुर्यात्** असत्सङ्गं **परित्यजेत्**॥
ब्राह्मे मुहूर्ते **उत्तिष्ठेत्** स्वस्थो रक्षार्थमायुषः।
**भक्षयेत्** दन्तपवनं दन्तमांसान्यबाधयन्॥३॥

- प्रत्ययेषु अपि अधिकतया कृत्प्रत्ययानां प्रयोगः आयुर्वेदीयग्रन्थेषु प्राप्यते। तत्रापि **क्त-क्त्वा-ल्यप्-यत्-ल्युट्-ण्वुल्**-आदीनां प्रत्ययानां प्रयोगाधिक्यम् अस्ति। यथा –

अनुरक्तः (क्त), स्मृताः(क्त), आश्रिताः(क्त), स्मृत्वा (क्त्वा), विधेयः (यत्),
आद्याः (यत्), शमनम् (ल्युट्), कोपनम् (ल्युट्),, वमनम् (ल्युट्), परिचारकः (ण्वुल्)

अवधातव्यं यत् एतेषां बोधनाय आयुर्वेदीयशब्दाः एव स्वीकृताः सन्ति। आयुर्वेदीयग्रन्थेषु कीदृशस्य सन्धेः प्रयोगः अस्ति। कीदृशस्य समासस्य प्रयोगः अस्ति इत्येवम् अन्विष्य पाठे प्रदर्शितम् अस्ति। येन आयुर्वेदस्य पठनम् कालक्रमेण सरलं भवति। एतानि पुस्तकानि पठित्वा कोऽपि साक्षात् अन्येषाम् आयुर्वेदीयग्रन्थानाम् अध्ययनम् अनुवादं विना कर्तुं शक्ष्यति।

❖ चतुर्थे भागे तु अष्टाङ्गहृदयस्य सूत्रस्थानस्य पञ्चदश अध्यायाः स्वीकृताः सन्ति। अत्र प्रायेण उपसहस्रं श्लोकाः सन्ति। अस्य चतुर्थस्य भागस्य भागत्रयं कृतम् अस्ति। अत्र प्रत्येकं श्लोकस्य पदच्छेदः, पदपरिचयः, पदार्थः, अन्वयः, तात्पर्यं व्याकरणांशाः च प्रदत्ताः सन्ति। व्याकरणांशे प्रत्येकं श्लोके विद्यमानानां सन्धिसमासादीनां परिचयः प्रदत्तः अस्ति। क्वचित् अवधेयम् इत्यपि दत्तम् अस्ति येन विषयस्य अवगमनं सारल्येन स्यात्।

इत्थम् आयुर्वेदीयग्रन्थेषु प्रयुक्तायाः भाषायाः आधारेण संस्कृतभाषाज्ञानवर्धनाय कौशलविकासाय च अत्रत्याः पाठाः सज्जीकृताः सन्ति। अस्मिन् पाठ्यक्रमे प्रत्येकं पाठ्यबिन्दोः उपस्थापनाय अभ्यासाय च आयुर्वेदीयग्रन्थेषु उपलब्धानि वाक्यानि अधिकतया स्वीकृतानि सन्ति। अस्मिन् पाठ्यक्रमे नामाङ्कनं कर्तुम् अत्र नुदतु www.learnsamskrit.online

आयुर्वेदाचार्याः सर्वान् अनुगृह्णन्तु इति आशास्य विरम्यते। शुभं भवतु।